तदाप्रयोगात्कुण्ठत्वं स्मिष्टतीतिविलम्बनात् न
ष्टाः प्रलपनैर्जाप्यादन्यमन्त्रैः सताविलाः ८१ उपे
क्षानास्वयाजाप्योद्वेषम्यादवमानिताः पंचविंश
तिहद्विशादोषाल्लाञ्छामयेन्नरः ८२ ॥
दग्धइतिस्पष्टोर्थः अथवायस्मिन्मंत्रे आदि
मध्यांतेषु कूर्चबीजषट्कं दृश्यते स मंत्रो दग्ध
इत्यर्थः तदुक्तं त्रिपुरार्णवे आदौ कूर्चद्वयं मध्ये
कूर्चबीजद्वयं तथा अंते कूर्चद्वयं यस्मिन्मंत्र
राजे षट्कं दृश्यते तत्षट्कर्णीको मंत्रो दग्ध इत्य
भिधीयते जपतां सिद्धिरोधः स्यात्साज्यः सर्वैः सदा
बुधैः अत्र कर्णः कूर्चबीजं तदुक्तं तत्रैव हंका
रस्यैव नामानि कूर्चं मायात्मरस्वती जलनीरंन
याकर्णं तटं कूलं महेश्वरीति अपिकेर्मपात्
प्रमत्तइतियस्मिन्मंत्रेऽपिकाक्षरयोगः कृतस्तम
त्रस्तत्रइत्यर्थः तदुक्तं त्रिपुरार्णवे आदावंते
च मध्ये चाप्यधिकाक्षरयोगतः त्रस्तः सो भिधि
तो मंत्रो जपतामशुभप्रदइति यद्यपि वर्णत्र
यं जपित्वा तल्लोपाद्धीं शुभोदयां ततस्त्रं
तं संयोज्य मंत्रादौ प्रजपेद्बुधः ततो वर्णत्रये
जाते मध्यादावपि योजयेत् ततो वर्णत्रये जाते

८ धात्मादावपियोजयेत् एवंयोभजतेविद्यांफल
मात्रनरोत्तरं अन्यथाहंति साविद्या साधकंना
त्रसंशयः इतित्रिपुरार्णवोक्तविरुद्धं तथाप्या
दावेवापिकासरयोगस्यनिषिद्धत्वबोध्यं गर्वि
तइति उपदेशस्यशास्त्रेयोविधिरभिहितस्तं
विनाप्राप्तमंत्रोगर्जितइत्यर्थः तदुक्तंत्रिपुरा
र्णवे मोहाद्वालोभतोवापिविधिहीनस्तुयो
जपेत् दीयतेसतुमंत्रस्तुगर्जितोनाहितः स
देति शात्रवइति वैरिकोमनाइतिस्पष्टोर्थः
बालाइति वृद्धाइति लघ्वक्षरप्रायाःबालाः
गुर्वक्षरप्रायावृद्धाइत्यर्थः लघ्वक्षरलक्षणं
गुर्वक्षरलक्षणंमातृकाप्रकाशेज्ञेयं निर्जिताइ
ति कर्मवाहस्यानिर्जिताइत्यर्थः तदुक्तंत्रिपु
रार्णवे स्वतंत्रोक्तंपरित्यज्य स्वात्मवात्सप्रिस्तोपि
वा स्वगुरुप्रोक्तवोवापिमंत्रासिद्धिप्रमाद
पि जपतर्पणहोमार्चामार्जनानिपुनःपुनः
कुर्वतोमंत्रराजःस्यान्निर्जितोनाहितःसदा
सनयच्छतिफलंतस्मैकल्पकोटिशतैरपि
तस्मात्सर्वप्रयत्नेनस्वतंत्रोक्तंसमाचरेत्
इति प्रसन्नाइति अनियमेनजप्तोमंत्रोसहे

त्यर्थः तदुक्तंत्रिपुरार्णवे नियमस्यचभंगे
नमंत्रस्यादसहः स्देति सत्ववर्जिताइति
पुरश्चरणवर्जिताइत्यर्थः तदुक्तंत्रिपुरार्ण
वे वीर्यहीनोयथादेहीसर्वकर्मसुनक्षमः
पुरश्चरणहीनोपितथामंत्रःप्रकीर्तितः नि
त्यनैमित्तिकाद्येषुपुरश्चर्यादिभिर्मंत्रः
भवेत्सत्वगुणोपेतःसेवयान्नृपतिर्यथा सत्व
गुणंसमापन्नोमंत्रःकल्पलतासमइति अपर्ण
रूपाइति स्वरवर्णपल्लवरहिताइत्यर्थः तदु
क्तंत्रिपुरार्णवे पल्लवाद्यैर्विलोपेन स्वरवर्णवि
लोपतः अपर्णत्वंसमापन्नःसमन्त्रच्छिन्नसंज्ञक
इति त्रैलोक्यडामरतंत्रे मंत्राणांपल्लवोवासो
मंत्राणांप्रणवः शिरः शिरःपल्लवसंयुक्तोमंत्रः
कामदुहाफलः स्यात्तंविनाभवेन्मूकः सप्रमःस्या
दासनंविना पल्लवेनविनामंत्रोनत्रःसपरिकीर्ति
तः शिरोहीनोमृतःप्रोक्तोहयथामंत्रोगुरुंविना ८
तोडक्षायदतोयोनिर्वीर्यस्याधिकाररः अंतराले
नवीजेनध्यामःकीलितउच्यते यस्यनाप्यत्रु
णोत्यत्रःसमंत्रः मूल्यउच्यते ऋषिदेवताछं
दोभिपरित्यक्तोभ्रष्टनामः मूकःसतोमतोन

१२ नोवीर्यहीनोह्यथार्हतः भुजंगः कीर्तितः स्फु
र्यदृष्टंत्रोह्यथाफलः यत्नाद्विपर्जयेत्सं
वंयदितात्सिद्धिमिच्छति नमोंतः शांतिके
पुष्टौप्राणिपातेचकीर्तितः वषडाकर्षणा
र्ह्येमेभुस्वाहांतः सिद्धिदायकः वौषट्पल्ल
वंतंयुक्तोमंत्रः पुष्ट्यादिसाधकः हुंकारपल्ल
वोपेतामारणेत्राणान्विना मंत्रभंजनकार्ये
चसद्योरभयनाशने वषडंतोमहाकालप्र
हमालाविनाशकः खेटेनोच्चाटनेवेपेमंत्रः
फट्पल्लवान्वितः ओंकारस्तुतरोमंत्रौ वेदा
गमसमुद्भवौ पल्लवोत्यागमेमंत्रे वैदिकेना
स्तिपल्लव पल्लवेनविनाजप्यो मंत्रोवेदस
मुद्भवः ननग्नः कीर्त्यतेयस्माद्विसर्गपरि
धानवानिति लंभिताइति अनुनासिकोत्तर
सहिताइत्यर्थः सानुनासिकनिरनुनासिक
लक्षणंतुमातृकान्यासेतेयं त्रिपुरार्णवेपि
सानुनासिकवर्णेनसंयुक्तालंभितामताइति
अकालविनियोगेनेति प्रसन्नाइतिस्मरणी
यं तदुक्तंत्रिपुरार्णवे स्वाप्यकालोवामवहो
जागरोदक्षिणवहः स्वापकालजपात्मंत्रो

प्रबुद्धोहंतिमंत्रिणाइति मंत्राइति पवेशप
ठनात्जपनात्क्रुद्धाइतिस्मरणीयं तदुक्तंत्रि
पुरार्णवे तदुक्तंत्रिपुरार्णवे कुलकोटिवि
तंदृष्ट्वाजपेद्यः साधकाधमः वत्सरांतस्यतस्य
तिमायुःकीर्तियशःश्रियः जपात्मंत्रेशुपत्रः
स्यात्क्रुद्धःसंहंतिसाधकमिति यस्मिन्मंत्रेयो
वर्णःकीलत्वेनाभिमतस्तेनविहीनाइत्यर्थः तदुक्तं
योगिनीहृदये बीजंमंत्रादिमंत्रस्यांतेवमध्यं
तकीलकं मंत्रांतेशक्तिरुद्दिष्टा बीजकीलक
शक्तयः यद्वर्णःकीलकत्वेनविहितस्तंवि
हायच तत्सर्वंलतयोवापिस्थापितेकीलक
त्वतः सर्वमंत्रस्यवर्णेनकीलितः सिद्धिरोध
कृत् रुद्धाइति संपिरुद्धिता रुद्धाइत्यर्थः
विसंधिकोभवेद्रुद्धः सर्वकर्मसुगर्हितइति
योगिनीहृदयवचनात् रुद्धः रोधइति वैरिश्च
दारसमन्विताद्ःखिताद्ःखिताइत्यर्थः तदु
क्तंत्रिपुरार्णवे दुःखितास्तुसुदीर्घावैरिव
र्णैस्तुसंयुताइतिखंडीभूता अंशजपात्खंडी
भूताइत्यर्थः तदुक्तंत्रिपुरार्णवे खंडीताव
र्णलोपेनेति अंगहीनाइति अंसंहताःकव

१२ चादिरहिताइत्यर्थः तथाचयोगिनीहृदये
अंगषट्ककवचनेत्रपादैर्विनामंत्रः अस्त्र
हीनः समाख्यातः सिद्धिं नैवप्रयच्छति अस्त्र
हीनेति अस्त्रेणोपदिष्टहीन इत्यर्थः तथा
च द्वितीयेनाभिषेकेण स्रणोत्थापितमंत्रः
अन्यथाहीनवीर्यः स्यात्सर्वकर्मवहिष्कृतः
इतियोगिनीतंत्रवचनात् सदाप्रयोगादिति
सर्वदाकाम्यप्रयोगान्मंत्रस्यकुंठताभवतीत्य
र्थः तदुक्तंत्रिपुरार्णवे प्रयुज्यते सदामंत्रा
ततच्छांतिंविनानरैः तेमंत्राःकुंठतांयातित
स्माच्छांतिंसमाचरेदिति अत्रशांतिस्त्वयुत
सावित्रीजपसहिताभूतमूलमंत्रजपः तद्वि
धिंप्रयोगपटलेवक्ष्यामः क्लिष्टेति दीर्घोत्त
रस्यप्लुतत्वेनोच्चारणेनह्रस्वस्यदीर्घत्वेनोच्चार
णेनचमंत्रस्यक्लेशोभवतीत्यर्थः तथाचतंत्रां
तरे एकमात्रोलघुर्ज्ञेयोद्विमात्रोदीर्घउच्यते
त्रिमात्रस्तुप्लुतोज्ञेयइत्येतत्स्वरलक्षणं ह्रस्व
त्वेनचदीर्घस्यदीर्घत्वेनप्लुतस्यच प्लुतत्वेन
चदीर्घस्यह्रस्वदीर्घतयाभुनः उच्चारणवशा
न्मंत्रःक्लिष्टोभवतिनान्यथा योमंत्रःक्लिष्ट

तांप्राप्तः समंत्रः सिद्धिरोधकृत् इति खण्डइ
ति मलपत्रजपात् खण्डाभवंतीत्यर्थः तदुक्तं
त्रिपुरार्णवे मौनंविनाजपेन्मंत्रांतन्मध्येख
नेजपः मंत्रोपिखंडितांयातिसिद्धिंनैवप्रय
च्छतीति अन्यमंत्रेरिति अन्यदेवतामंत्रैः
सहमूलमंत्रजपादित्यर्थः तदुक्तंयोगिनी
हृदये मंत्रांतरंनरःक्लीयाद्वर्जयेद्देवतांतरं
प्रयोगांतरंचैववर्जयेत्साधकांतरं तदामंत्रो
भवेन्नूनंछिन्नकामदुघाफलः चतुर्भिःसंयुतो
मंत्रोभवेन्मलिनसंज्ञकइति उपेक्षेति उपेक्षा
देवतागुरुमंत्राणामेषअवस्थाअनादरता वै
षम्यं मंत्रगुरूणामसमदृष्टवशात्किंचित्तुः एवं
चेन्माथतेतदाऽयंमंत्रः किमर्थंफलतिइतिम
नसिनिधायजपोक्रियतेसएवोपेक्षाजपइ
त्यर्थः तदुक्तंत्रिपुरार्णवे मंत्रेगुरौदेवता
यामुपेक्षाक्रियतेयदि अवस्थयावावैषम्या
न्मंत्रः स्यात्तदवमानितः इति ॥

मंत्रदोषनिरूपणम् दग्धः षट्कर्णगोमंत्र
इति ॥ ८८

बन्धनं योनिमुद्राया मन्त्राणां वीर्ययोजनम् अयं
दोषपरिशान्त्यर्थं संस्कारेषु हितात्मवान् ८२
बन्धनमिति योनिमुद्राबन्धनेन सर्वे दोषा गच्छ
न्तीत्यर्थः ॥

मन्त्रदोषपरिहारप्रकारः बन्धनं योनिमुद्रा
या इति ॥

गुरोर्लक्षणमेतावदादिमान्तं तु वेदयेत् आदि
मान्तविहीनास्तु वर्णाः स्युः शरदभ्रवत् ८३
तस्मादादितएवासौ ब्रूयात तदर्हं कृतिम् यदर्कं
कारविज्ञानात्मस्तमो जायते नरः ८४ अनादि
कमन्तं सिद्धमातृकायंत्रयोजनात् तदा तस्य सि
द्धिं तां विद्धि सर्वमन्त्रार्थविग्रहाम् ८५
तस्माद्गुरुः प्रयत्नेन साधारणं
बालसंस्कारविशेषः अनादीति मातृका
यंत्रयोजनं मन्त्रवर्णस्य ॥

आदिमान्तवेदनेन गुरोर्वै शिष्यमंत्राणां वी
र्यवत्त्वं तदा तस्य सिद्धिं चाह गुरोरिति ॥

द्विजातीनां तु संस्कारं वेदोक्तं समुदाहृतम् तेषां
च तत्र तत्रापि विद्यया विधिमाचरेत् ८६ सविद्या
स्मरणं कुर्यात्क्रियां सर्वत्र चोदिताम् तेन तस्य
यता सिद्धिः सर्वत्र भवति ध्रुवम् ८७ अन्येषाम
पि वर्णानां विद्यया समुपाचरेत् नियन्ते विद्य
यातो विद्यया न्यस्तमाचरेत् ८८ ॥
भविष्योत्तरे यास्त्री भर्ता विमुक्ता च स्वभावात्संस्
युता तां च मंत्राण्गृह्णातु सभर्तृका तद्वशया
विना स्वधर्मं यत्किंचिद्देवताराधनादिकं परिभ्र
श्येत तस्य स्वात्मनो तैलकतं स्यात् कलानां
वे विधवायाः सुतादेशात्कन्यायाः पितुराज्ञया
नाधिकारः स्वतो नार्यो भार्याया भर्तुराज्ञया
स्त्रीशूद्राणामयं मंत्री नमोन्तः स्वप्रभावतः एत
ज्ज्ञात्वा महेशेन चाण्डालानपि दीक्षयेत् इति रु
द्रयामलात् अयं प्रासादमंत्रः तथा च श्रुति
स्मृतयः शूद्राधर्मिकाः द्विजसेवकाः स्त्रि
यः पतिव्रताश्चान्ये प्रतिलोमानुलोमजाः
लोकाश्चाण्डालपर्यंताः सर्वेप्यत्राधिकारिणः
स्वजातिधर्मनिरताः भक्ताः सर्वेश्वरस्य च उपदे
शमहेशानां तन्त्रज्ञात्यनुसारिता नैवेदिकं

१५ जपेच्छूद्रः स्त्रियश्चैककदाचन: नमोन्तं शिव
मंत्रं वा वैष्णवं चैष्यते बुधैः याज्ञवल्क्योपि
स्वाहाप्रणवसंपुटं मंत्रं शूद्रे ददद्द्विजः शूद्रो
निरयगामी स्याद्विप्रश्च दत्त्वा शुयात् याम
ले पकद्वित्रिचतुर्थं चवर्णा स्यात्तोच्चयोग्य
तो भक्तपुत्रान्गणांश्चापि क्रमाद्दोर्मन्त्रंकरे

द्विजादीनां स्वसंस्कारेषु विद्याप्रयोगविधिः
द्विजादीनामिति ॥

संस्कारभोजयेदेकमनेकं वा स्वशक्तितः यो
गिनं विद्यया सिद्धं सर्वतत्त्वनिमज्जितम् ८९ क
र्णिकाव स्वनाद्येसंस्तूजयित्वा प्रणम्य च विद्य
याविष्टजंमंत्री स्वविद्यासिद्धये शिवे ९०

गुरोस्तु जन्मदिवसं विद्याप्राप्तिदिनं तथा स्व
जन्मदिवसं नाथप्राप्तिवासरमेव च ९१
श्वतरत्रयसंपातदिनं सर्गादिनं तथा षट्
पर्वाणि विशिष्टानि सदर्शनप्रपर्वकम् ९२
मासतो वर्षतो वापि कुर्यादेतेषु पूजनम्
गुरोस्तु जीवतो नित्यं चाभिस्ततुत्रकादिकम् ९३
पूजयेत्सततं च प्रणामाद्येन पाचरेत् तदभा
वे तत्कुलीनं तत्पुत्रकं समर्चयेत् ९४

१९ स्तुवीत पंचभिः श्लोकैस्तं नित्यं सर्वार्थसिद्धये
प्रातः प्रबोधसमये जपान्ते दिवसं भवेत् ९५
नमस्ते नाथ भगवन् शिवाय गुरुरूपिणे
विद्यावतारसंसिद्ध्यै स्वीकृतानेकविग्रह ९६
नवाय नवरूपाय परमार्थैकरूपिणे सर्व
ज्ञानतमोभेदभानवे चिद्घनाय ते ९७
स्वतन्त्राय दयाक्लृप्तविग्रहाय शिवात्मने
परतन्त्राय भक्तानां भव्यानां भव्यरूपिणे ९८
विवेकिनां विवेकाय विमर्शाय विमर्शिनाम्
प्रकाशिनां प्रकाशाय ज्ञानिनां ज्ञानरूपिणे ९९
पुरस्तात्पार्श्वयोः पृष्ठे नमस्कुर्यादुपर्यधः सदा
मच्चित्तरूपेण विधेहि भवदासनम् १०० ॥
इदं स्तोत्रं पठेन्नित्यं विद्यासिद्ध्यै प्रयत्नतः
चक्रे देव्यास्सशक्तीनामर्घ्यान्ते गुरुमण्डले
गुरौ मूर्ते शिवानाञ्च गुरूणां त्रिविधा स्थितिः
गुरुमण्डलमेतद्धि पारंपर्यमिति स्मृतम्

पारम्पर्यमिति ज्ञात्वा सम्प्रदायस्थिरो भवेत्
सम्प्रदाये स्थिरज्ञाते संप्रदायवती भवेत्
देवता तेन विद्याश्च मन्त्राः सिद्ध्यन्ति तत्क्षणात्
पुरश्चर्या तु नित्यं हि पूजयेद्गुरुमण्डलम्
सम्प्रदायपरिज्ञानं मन्त्रवीर्यस्य संस्मृतिः
एतद्द्वयं न जानाति साधकस्तु कथं भवेत्
नित्ये नैमित्तिके चैव चार्यं काम्ये च तद्द्वयम्
प्राप्तं कालानुपर्यायात्स्मर्तुं त्रीण्यनुक्रमात्
नामानि स्नायकेंद्रस्य सम्प्रदायप्रसिद्धये भवे
युक्तानि यत्नेन ह्येतानि श्रीगुरोरपि पारंपर्य
तथा ज्ञात्वा स्वशिष्येभ्यो निवेदयेत् गुर्वात्म
देवतात्मनामैक्यं संभावयन्सदा तदात्मपा
लनो ह्युक्तः स्तोत्रमः शिव उच्यते ॥

गुरुस्तवनोपदेशानन्तरं तत्स्तुतिनिर्देशः
स्तुवीत पञ्चभिरिति ॥

ततस्सापान्त्रबोध्य मूर्ध्नि ब्रह्मरन्ध्रगं त्रिपुरात्मानमा
त्मानं विभाव्य ज्योतीरूपं सगुरुपादं चोत्तिष्ठेत्। ततो
बलिदानेनैव तुष्टाः स्त्रीरूपाः सर्वा देवी विभावयेत्

ततो रक्ताम्बरधरं स्वधिरां रत्नभूषादिभूतं प्रसन्न
चेतसं कर्पूरवासिताख्यां बरांगवर्नं बद्धपद्मासनं
प्रवृदनं आयतप्राणं षोडशाक्षरमंत्रेण दत्तबलिं
पूजितगुरुं स्वात्मानं विभावयेत्। ततस्तदाज्ञया पूजां
मानसोपचारैर्यथाविधि संपाद्य परमेश्वरं वसं पूज्य
तन्मयीभूतं स्वात्मानं च ध्यात्वा ॐ ऐं १६ नव
रत्नखण्डविराजिताय नवरत्नमयद्वीपाय नमः पुष्पा
य नीलाय वैदूर्याय विद्रुमाय मौक्तिका मरकताय
वज्राय गोमेदाय पद्मरागकाय एतेभ्यो नमः
कल्पकोद्यानाय ऋतुभ्यो नमः अश्वरूपे
भ्य इन्द्रियेभ्यो नमः गजरूपेभ्यः शब्दस्पर्शरस
रूपगन्धेभ्यो नमः कालाय मुद्राभ्यो मातृकाभ्यो
नमः रत्नाय नमः देशाय नमः गुरुभ्यो नमः
तत्त्वेभ्यो नमः ग्रहेभ्यः मूर्तये चक्रेश्वरी
भ्यो नमः कल्परत्नोद्यपरिखाय नमः माणिक्य
मण्डपाय नमः सर्वाभ्यो योगिनीभ्यो नमः
मातृभ्यश्च नमः ==

पंचत्रिंशे पटले प्रथमतो षोडशनित्यानां स्वा
त्मत्वे वासनां स्मरेत् इति श्लोकादिना षोडशनित्या
नां वासना निर्णयः अत्रैव षड्विंशति श्लोक प्रभृति
मंत्रनिर्माणविधानं पिण्डकर्तर्यादि संज्ञाविधा
यकम् ॥ अत्रैव त्रिंशच्छ्लोक प्रभृति मंत्रभे
दवर्णनम् षट्चतुर्विंशति तथेत्यादिना ॥

३	४	५	६	७	८	९
६	२४	१२०	७२०	५०४०	४०३२०	३६२८८०

अत्र च त्रयस्त्रिंशच्छ्लोके त्रिप्रभृति नवपर्यन्तं स
ङ्ख्यानां पदसमुदायानां रूपभेदसंख्या भवन्तीत्यर्थो
ज्ञेयः ॥ अत्रैव चतुःचत्वारिंशत्तम श्लोकतः सि
द्धादिचक्र तत्तद्विषये तेषां तेषां मन्त्राणामुद्धार
क्रमार्थवर्णादि संज्ञा ॥

अत्रैव द्विषष्टितम श्लोकतो मन्त्रार्थविषयकात्रि
विधत्वनिरूपणम् ॥
अत्रैव पंचषष्टि श्लोकतो मंत्रवीर्यकथनम् ॥
अत्रैव चतुःसप्ततितम श्लोक प्रभृति सिद्ध्याद्यर्थनि
रूपणम् ॥
अत्रैव षडशीतितम श्लोक प्रभृति मंत्राणां वैरीकरणा
दिनिरूपणम् ॥

अत्रैव पटलसमाप्तिपर्यन्तं श्रीदेव्याः काम्यार्चना
दिविधिनिरूपणम् ॥
इति पंचत्रिंशपटलसमाप्तिः ॥

अथ षड्त्रिंशे पटले प्रथमश्लोकतः प्रभृति विंशति
विपक्षवर्णनम् ॥
अत्रैव सप्तमश्लोकतः प्रश्नानां क्रमेणोत्तरवर्णनम् ॥
अत्रैव चत्वारिंशत्तमश्लोकप्रभृतिकालावयववर्ण
नम् ॥
अत्रैवोपासकानामाचारादिवर्णनम् ॥
इति षट्त्रिंशपटलसमाप्तिः ॥